# 5. संस्कृतम् ( सम्प्रेषणात्मकम् ) 122
## दशमी कक्षा
## सततं व्यापकम् मूल्याङ्कनम् ( द्वितीय सत्रम् )
## अक्तूबर-मार्च ( 2010 ) द्वितीय सत्रम्

पूर्णांक : 80

2. संकलनात्मकमूल्याङ्कनाय परीक्षणपत्रम्(सितम्बरमासे) । परीक्षणपत्रे चत्वार: खण्डा: भविष्यन्ति–

| | | |
|---|---|---|
| 'क' खण्ड: | अपठित–अवबोधनम् | (12) |
| 'ख' खण्ड: | रचनात्मक–कार्यम् | (12) |
| 'ग' खण्ड: | अनुप्रयुक्त–व्याकरणम् | (28) |
| 'घ' खण्ड : | पठित-अवबोधनम् | (28) |

### खण्डानानुसारं विषया: मूल्याभार:च

| खण्ड: | विषया: | प्रश्नप्रकारा: | प्रश्नसङ्ख्या: | मूल्यभार: |
|---|---|---|---|---|
| 'क' | | **अपठित–अवबोधनम्** | | **( 12 )** |
| (i) | अपठित-अवबोधनम् | बहुविकल्पात्मका: (MCQ) | | 8 |
| (ii) | एक: अनुच्छेद: (80-100 शब्दा:) | लघूत्तरात्मका: (SA) | | 4 |
| | | **पूर्णभार:** | | **12** |
| 'ख' | | **रचनात्मक–कार्यम्** | | **( 12 )** |
| (i) | अनौपचारिकं पत्रम् | निबन्धात्मका: | 1 | 4 |
| (ii) | चित्रवर्णनम्/अनुच्छेदलेखनम् वा | निबन्धात्मका: | 1 | 8 |
| | | **पूर्णभार:** | | **12** |
| 'ग' | | **अनुप्रयुक्तव्याकरणम्** | | **( 28 )** |
| (i) | सन्धि | लघूत्तरात्मक: | 1 | 4 |
| (ii) | समास: | बहुविकल्पात्मका: | 1 | 6 |
| (iii) | प्रत्यया: | ब.वि./ल. | 1 | 4 |
| (iv) | अव्ययपदानि | लघूत्तरात्मक | 1 | 6 |
| (v) | सङ्ख्या | लघूत्तरात्मक: / ब.वि. | 1 | 4 |
| (vi) | संशोधनकार्यम् | ब.वि. | 1 | 4 |
| | | **कुल भार:** | | **28** |
| 'घ' | | **पठित–अवबोधनम्** | | **( 28 )** |
| (i) | गद्यांश–पद्यांश–नाट्यांशा: | ब.वि./लघूत्तरात्मका: | 1 | 12 |
| (ii) | भावावबोधनम् | बहुविकल्पात्मका: | 1 | 2 |
| (iii) | श्लोकान्वय: | बहुविकल्पात्मका: (MCQ) | 1 | 4 |
| (iv) | प्रश्न–निर्माणम् | लघूत्तरात्मका: | 1 | 4 |
| (v) | कथाक्रम: | निबंधात्मका: | 1 | 4 |
| (v) | शब्दार्थमेलनम् | बहुविकल्पात्मका: | 1 | 2 |
| | | **कुल भार:** | | **28** |

**सम्पूर्णभार: 80**

# आदर्शप्रश्नपत्रम्

## संस्कृतम् ( सम्प्रेषणात्मकम् )

## कक्षा - दशमी

## ( सङ्कलनात्मकं मूल्याङ्कनम् )

## ( द्वितीयसत्रम् )

**समय : होरात्रयम्** **पूर्णाङ्काः ८०**

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| **खण्डः ( क ) अपठित-अवबोधनम्** | - | **12 अङ्काः** |
| **खण्डः ( ख ) रचनात्मकं कार्यम्** | - | **12 अङ्काः** |
| **खण्डः ( ग ) अनुप्रयुक्तव्याकरणम्** | - | **28 अङ्काः** |
| **खण्डः ( घ ) पठित-अवबोधनम्** | - | **28 अङ्का** |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्डः- ( क ) अपठित-अवबोधनम्.

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अस्माकं देशः प्राचीनकालादेव प्राकृतिक पर्यावरणस्य पोषकः। वैदिक-काले यद्यपि पर्यावरणप्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते। अद्य पर्यावरण-प्रदूषणम् संसारस्य भीषणतमा समस्या परं जनाः अस्याः गाम्भीर्यम् नानुभवन्ति। पर्यावरणं रक्षणीयम् वृक्षाः रोपणीयाः रक्षणीयाः इति ऋण्वन्तः उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनम् पश्यामः। 'प्लास्टिक' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः एतेषां प्रयोगं बाहुल्येन कुर्वन्ति। पृथिव्याः 'ओजोन' इति रक्षाकवचः छिद्यते इति सर्वविदितम् तथापि पर्यावरण प्रदूषकं धूमं क्षिपतां वाहनानाम्, औद्योगिक-यन्त्रागाराणां संख्या निरन्तरं वर्धमाना अस्ति। यद्यपि विकासाय नवीनाः अविष्काराः, तेभ्यः च अनुसन्धानम् आवश्यकम्। सञ्चाराय विस्तृताः मार्गाः, जनानाम् कृते सर्वविध -सुखसुविधाः अपि आवश्यकाः एव। परं यदि पर्यावरणं प्राणि जीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति। तदा कुत्र भविष्यतः सुखसुविधाः विकासः वा? इत्यस्ति चिन्तनीयः विषयः।

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

**I. एकपदेन उत्तरत।** 1x2= 2

(i) पर्यावरणस्य अनुकूलता किमर्थम् अनिवार्या?

(अ) विकासाय (ब) सदाचाराय

(स) अनुसन्धानाय (द) प्राणिजीवनाय

(ii) कस्या: रक्षाकवचं छिद्यते?

(अ) धूमस्य (ब) विकासस्य

(स) पृथिव्या: (द) सुखसुविधाया:

**II. पूर्णवाक्येन उत्तरत।** 2x2= 4

(i) किं जानन्त: जना: प्लास्टिक निर्मितवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति?

(ii) जना: कस्या: गाम्भीर्यम् नानुभवन्ति?

**III. निर्देशानुसारं प्रदनविकल्पेभ्य: उचितम् उनरं चित्वा लिखत।** 1x4= 4

(i) 'वैदिक-काले यद्यपि ..................................., अस्याम् पंक्तौ 'आसीत्' इति क्रियापदस्य कर्तृपदं चित्वा लिखत।

(अ) वैदिककाल: (ब) पर्यावरण-प्रदूषणस्य

(स) समस्या (द) यद्यपि

(ii) 'तेषां कर्तनम् पश्याम:' अत्र 'तेषाम्' इति सर्वनामपदं केभ्य: प्रयुक्तम्??

(अ) वृक्षेभ्य: (ब) पर्यावरणाय

(स) जनेभ्य: (द) कर्तनाय

(iii) 'सततम्' इति पदस्य पर्यायपदं चित्वा लिखत।

(अ) बाहुल्येन (ब) निरन्तरम

(स) अनुकूलम् (द) चिन्तनीय:

(iv) 'मार्गा:' इति पदस्य किं विशेषणपदम?

(अ) सुखसुविधा: (ब) आवश्यका:

(स) विस्तृता: (द) सदाचाराय

**IV.** **अस्य गद्यांशस्य उचितं शीर्षकं प्रदनविकल्पेभ्यः चित्वा लिखत।** 2

(अ) अस्माकम् पर्यावरणम् (ब) प्रदूषणस्य समस्या

(स) पर्यावरणं संरक्ष्यमेव (द) चिन्तनीयः विषयः

**खण्डः-'ख' (रचनात्मकं कार्यम्) 12 अङ्काः**

**2.** **भवान् राघवः। विद्यालयस्य वार्षिकोत्सव विषये पितरं सूचयन् लिखितेऽस्मिन् पत्रे मञ्जूषातः उचित पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखत।** 4

हिमालय-छात्रावासः

(i) ..........................................................

दिनाङ्क ..........................................

पूजनीयाः (ii) ...............................................

सादरं नमो नमः।

अत्र कुशलं तत्रास्तु। भवान् इदं ज्ञात्वा अतिप्रसन्नः भविष्यति यत् गतदिवसे अन्तर्विद्यालयीयवाद-विवाद प्रतियोगितायां मया प्रथमं स्थानं प्राप्तम्। क्रीडादिवसे (iii) .......................................... अहम् एव प्रथमः आसम्। अस्य वर्षस्य नवम.कक्षायाः वार्षिक परीक्षायाम् अपि मया एव (iv) ..................... ................... स्थानं लब्धम्। सर्वेऽपि मम अध्यापकाः अतिप्रसन्ना सन्ति। अस्मिन् वर्षे वार्षिकोत्सवे मया त्रयः पुरस्काराः (v) ........................................।

अयम् वार्षिकः समारोहः आगामि.रविवासरे आयोजयिष्यते। विद्यालयस्य पक्षतः गृहे (vi) .............. .............................. तु ह्यः एव प्रेषितम्। अहमपि भवन्तं सूचयामि यत् अस्मिन् महत्वपूर्णे दिवसे मात्रा सह अवश्यम् आगच्छतु भवान्। एवम् मम (vii) ......................................... भविष्यति। भवन्तौ अपि गर्वम् अनुभविष्यतः। मातृचरणयोः मम प्रणामाः। भागिन्यै स्नेहम्। (viii) ....................................... पुत्रम् राघवः

**मञ्जूषा**

निमन्त्रणपत्रं, धावन-प्रतियोगितायाम्, प्राप्स्यन्ते, नवदिल्लीतः,

उत्साहवृद्धिः, पितृमहोदयाः, भवतः, प्रथमं

| प्र.सं. | प्रश्न | | अंक |
|---|---|---|---|
| 3. | **मञ्जूषायां प्रदत्त-शब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखतः** | 2×4= | 8 |




**मञ्जूषा**

समुद्रतटस्य-दृश्यम्, अनेकेजनाः, विविधवर्णानि छत्राणि, बालाः वृद्धाः, युवानः, युवतयः आनन्दम् अनुभवन्ति विश्रामं कुर्वन्ति, खेलन्ति, जले विहरन्ति, सरण्याम् वाहनानि कुक्कुरः, पादकन्दुकम्, पुरतः वृक्षाः, विविध क्रियासु-संलग्नाः जनाः, सूर्यस्य आतपम् सेवन्ते,

**अथवा**

**'स्वच्छतायाः महत्त्वम्' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि संस्कृतेन लिखत :** 2×4= 8

**मञ्जूषा**

स्वच्छतायाः, अनेकऋषिभिः उपयोगिता, सभ्यतायै, स्वास्थ्यरक्षायै, स्वच्छम्, शरीरम्, स्थानम्, वस्त्रादिकम्, जलम्, स्वच्छ-वस्त्राणि, खाद्यवस्तूनि, मनसि प्रसन्नता, समाजे सम्मानम्।

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

## खण्डः'ग' (अनुप्रयुक्तव्याकरणम्) 28 अङ्काः

**4. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा चित्वा लिखत :** 1x4= 4

(i) प्रति + एकम् अयनस्य अवधिः षण्मासाः।

(ii) गुरावागते छात्राः तूष्णीम् अभवन्।

(iii) भवत् + मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि।

(iv) पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यम्।

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां, समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 1x6= 6

(i) प्रतिहतम् अन्तःकरणं यस्य सः प्रच्छन्नभाग्यः अचिन्तयत्।

(अ) प्रतिहतमन्तः करणं (ब) प्रतिहतकरणम्

(स) प्रतिहतान्तःकरणः (द) प्रत्यन्तः करणम्

(ii) जन्तुशालायां बहवः पशुपक्षिणः सन्ति।

(अ) पशुः च पक्षी च (ब) पशू च पक्षिणौ च

(स) पशुम् च पक्षिणम् च (द) पशवः च पक्षिणः च

(iii) काकः क्रोधेन सहितम् प्रविशति।

(अ) सक्रोधम् (ब) क्रोधसहितम्

(स) भोजनम् सामग्रीम् (द) सहितक्रोधम्

(iv) शिशिरः च वसन्तः च जीवने पुनः पुनः आगच्छतः।

(अ) शिशिश्वरसन्तः (ब) शिशिर वसन्तौ

(स) शिशिर.वसन्ताः (द) शिशिर.वसन्तम्

(v) विमूढीधीः पक्वं फलं त्यक्त्वा अपक्वं खादति।

(अ) विमूढी धीः यस्य सः (ब) विमूढधीः यस्मै सः

(स) विमूढा धीः यस्य सः (द) विमूढाः धियः यस्मिन् सः

(vi) छात्राः प्रतिदिनं संस्कृतं पठेयुः।

(अ) प्रति प्रति दिनम् (ब) प्रत्येकं दिनम्

(स) दिने एकवारम् (द) दिनं दिनम् इति

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

6.

**( क ) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं विकल्पेभ्यः चित्वा वाक्यानि उत्तरपुस्तिकायां लिखत।** ½×4= 2

(i) प्रच्छन्नभाग्यः गर्तसङ्कुले मार्गे क्रीड् + शतृ बालकान् अपश्यत्।

(अ) क्रीडन्तः (आ) क्रीडतः

(इ) क्रीडन् (ई) क्रीडतान्

(ii) कियती प्राचीना इयं सृष्टिः?

(अ) कियत् + ङीप् (आ) कियत + णिनि

(इ) किम् + यती (ई) कियत + ई

(iii) ग्रीष्मकाले सूर्यस्य प्रचण्डत्वम् असह्यं भवति।

(अ) प्रचण्ड + तण्यत् (आ) प्रचण्ड + तल्

(स) प्रचण्ड + त्व (ई) प्रचण्ड + मतुप्

(iv) भूतं वर्तमानं भविष्यत् च वि + ईक्ष+शानच् कालः सर्वदा विद्यते।

(अ) वीक्षमाणः (आ) वीक्षमानाः

(इ) विक्षमाणः (ई) वीक्षमानम्

**( ख ) अधोलिखितवाक्येषु रेखाङ्कितपदयोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा वाक्ये वाक्यम् पुनः उत्तरपुस्तिकायां लिखत।** 1×2= 2

(i) बकः मीनान् छलेन अधिगृह्य क्रूरतया भक्षयति।

(ii) सपर्वतवन.द्रुमा सकल+टाप् मही कम्पते।

7. **अधोलिखिते संवादे रिक्तस्थानानि मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः पूरयित्वा संवादम् उत्तरपुस्तिकायां लिखत।** 1x6= 6

शशङ्क :- मित्र शेखर! (i) .......................... ग्रीष्मावकाशे किं करोषि?

शेखर :- मित्र! यावत् विद्यालयस्य अवकाशः प्रचलति (ii) ..........................

अहं श्रीमद्भगवद्गीतायाः स्वाध्यायं करोमि।

शशाङ्क :- शेखर! त्वम् गीताया: स्वाध्यायं (iii) ........................... करोषि?

शेखर :- किं त्वं न जानासि (iv) ........................... मणिकापाठ्यपुस्तके एक: पाठ: गीतायाम् एव आधारित: अस्ति।

शशाङ्क :- अतीव शोभनम्। अद्यप्रभृति: त्वं (v) ........................... गीताया: अध्ययनं करिष्यसि तदा अहम् अपि त्वया सह पठिष्यामि।

शेखर :- अवश्यमेव। अहं (vi) ........................... सायं चतुर्वादने गीताया: स्वाध्यायं करिष्यामि।

**मञ्जूषा**

| |
|---|
| श्व: तावत्, यत्, यदा, सम्प्रति, किमर्थम् |

**8.**

**( क ) प्रदत्तेषु विकल्पेषु शुद्धम् संख्यावाचकपदं चित्वा लिखत।** ½x4= 2

(i) वेदा: .................................... आसन्।

(अ) चतुर: (ब) चत्वारि

(स) चत्वार: (द) चतसृ

(ii) दशरथस्य .................................... राज्ञ्य: आसन्।

(अ) त्रय: (ब) तिस्र:

(स) त्रीणि (द) त्रिभ्य:

(iii) पुरा .................................... वने सिंह: वसति स्म।

(अ) एकम् (ब) एके

(स) एकस्मिन् (द) एक:

(iv) करण्डके .................................... फले स्त:।

(अ) द्वे (ब) द्वाभ्याम्

(स) द्वौ (द) द्वयो:

**( ख ) अधोलिखितेषु वाक्येषु अङ्काणां स्थाने संस्कृत.संख्यावाचकविशेषणैः रिक्तस्थानपूर्तिं कृत्वा वाक्यम् उत्तरपुस्तिकायां लिखत।** 1×2= 2

(i) मम कक्षायाम् ...........(45)........... छात्राः सन्ति।

(ii) एकस्मिन् दिवसे ............(24)............ होराः भवन्ति।

**9. अधोलिखित वाक्येषु रेखाङ्कितं पदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेषु शुद्धम् उत्तरम् चित्वा वाक्यं पुनः उत्तरपुस्तिकायां लिखत।** 1×4= 4

(i) त्वम् मम मित्रम् <u>अस्ति</u>।

(अ) भवति (ब) स्तः

(स) अस्मि (द) असि

(ii) मम समीपे दश <u>पुस्तकः</u> सन्ति।

(अ) पुस्तकाः (ब) पुस्तके

(स) पुस्तकानि (द) पुस्तकेषु

(iii) अहं ह्यः मुम्बई नगरम् <u>गमिष्यामि</u>।

(अ) गच्छामि (ब) अगच्छः

(स) अगच्छम् (द) गच्छसि

(iv) मणिका पाठ्यपुस्तके एकादशः <u>पाठम्</u> सन्ति।

(अ) पाठः (ब) पाठानि

(स) पाठान् (द) पाठाः

## खण्डः- 'घ' ( पठित-अवबोधनम् ) 28 अङ्काः

**10. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

**( अ ) गद्यांशः**

कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदापि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्ते विकासस्य प्रलयस्य च। इदम् जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, 'कियती प्राचीना इयम् सृष्टिः।' नैव! तर्हि श्रृणुत ध्यानेन।

| प्र.सं. | प्रश्न | | अंक |
|---|---|---|---|
| I. | एकपदेन उत्तरत। | ½×2= | 1 |

(i) कालः कथं परिवर्तते?

(ii) अस्मिन् गद्यांशे कः वक्ता?

**II. पूर्णवाक्येन उत्तरत।** 1×1= 1

(i) कालः किं गणयति?

**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** ½×4= 2

(i) गद्यांशे 'जानीथ' इति क्रियापदस्य किं कर्तृपदम्?

(अ) इयम्　　(ब) अहम्

(स) यूयम्　　(द) सृष्टिः

(ii) 'सर्वदा विद्यमानोऽस्य' अत्र ''अस्य'' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) कालाय　　(ब) जगते

(स) जायते　　(द) विद्यमानः

(iii) अहमेव साक्षी जगतः उत्पत्तेः। अत्र 'उत्पत्तेः इति पदस्य किं विपरीतार्थकं पदम्?

(अ) विकासस्य　　(ब) जन्मनः

(स) प्रलयस्य　　(द) विलीयते

(iv) 'इदं' जगत् तु पुनः पुनः जायते' अत्र 'जगत्' इति पदस्य किं विशेषणपदम्?

(अ) पुनः पुनः　　(ब) जायते

(स) इदम्　　(द) विलीयते

**(आ) पद्यांशः-**

**पितायच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृताज्ञता॥**

**I. एकपदेन उत्तरत।** ½x2=1

(i) पिता कदा पुत्राय विद्याधनं यच्छति?

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

(ii) विद्याधनं दातुम् पिता किम् करोति?

**II.** **पूर्णवाक्येन उत्तरत।** ½x1=1

(i) पुत्रस्य किं कथनम् तस्य कृतज्ञतां ज्ञापयति?

**III.** **निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** 1x2=2

(i) 'महत्' इति पदं कस्य पदस्य विशेषणम्?

(अ) पिता (ब) विद्याधनं

(स) पुत्राय (द) तपः

(ii) 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) पित्रे (ब) तेपे

(स) तपः (द) पुत्राय

**(इ) नाट्यांशः-**

**राजहंसः-** हुं! किमनेन? एतत् कार्यं तु कुक्कुटोऽपि करोति।

**काकः-** (विहस्य) कुक्कुटः! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

**राजहंसः-** भो भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि।

**काकः-** अहो अज्ञानं भवत्याः! अरे। यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जनाः प्रियस्य आगमनसंकेतं मत्वा हृष्यन्ति। किं बहुना। अहम् तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति- ''अनृतं वदसि चेत् काकः दशेत्।'' अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्। सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव। किं न श्रुतं काकचेष्टा, बकोध्यानम्।

**I.** **एकपदेन उत्तरत।** ½x2= 1

(i) कः आत्मानं छात्राणां कृते आदर्शः इव प्रतिपादयति?

(ii) अद्य नगरेषु के दुर्लभाः?

**II.** **पूर्णवाक्येन उत्तरत।** 1x1= 1

(i) मातरः शिशून् किं कथयन्ति?

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

**III.** **निर्देशानुसारम् शुद्धम् उत्तरम् विकल्पेभ्यः चित्वा लिखत।** ½x4=2

(i) 'मूकः' इति पदस्य किं विपरीतार्थकं पदं गद्यांशे प्रयुक्तम्?

(अ) कुतः (आ) अनृतम्

(इ) वाचालः (ई) प्रसिण्म्

(ii) 'अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्' अत्र 'अस्माकं' इति सर्वनाम पद केभ्यः प्रयुक्तम्?

(अ) शिशुभ्यः (आ) छात्रेभ्यः

(स) काकेभ्यः (ई) पक्षिभ्यः

(iii) 'क्वणितैः' इति पदस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(अ) जनजागरणात् (आ) किमपि

(ब) कटुभिः (ई) अन्यत्

(iv) 'हृष्यन्ति' इति क्रियापदस्य किं कर्तृपदम्?

(अ) राजहंसाः (आ) काकाः

(इ) जनाः (ई) प्रियस्य

11. **अधोलिखितस्य कथनस्य समुचितं भावं प्रदत्तविकल्पेभ्यः चित्वा उत्तरपुस्तिकासु लिखत।**1x2= 2

(क) अलं चिन्तया। आपदां तरणिः धैर्यम्।

(i) धैर्येण आपदः नौका इव भवन्ति।

(ii) विपत्सु सूर्यः एव मयातव्यः।

(iii) यथा नौका-साहाय्येन जनाः पारं गच्छन्ति एवमेव धैर्यबलेन जनाः आपद्भ्यः तरन्ति।

(iv) विपत्तौ नरः नदीं तीर्त्वा एव धैर्यम् आप्नोति।

(ख) मम कलनस्य आधारः तु सूर्यः एव

(i) कालः एव सूर्यस्य गणनायाः आधारः।

(ii) सूर्यः काल-गणनां करोति।

(iii) कालः अपि सूर्यम् गणयति।

(iv) सूर्यम विना कालस्य गणना असम्भवा।

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

**12. अधोलिखित.श्लोकयोः अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत।** ½x8= 4

(i) नानाशस्त्र.विदः पूर्वे येप्यतीता महारथाः।

नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन।।

अन्वयः नानाशस्त्रविदः ये ......................(i)................ पूर्वे महारथः .............(ii)................
तैः एतद् ..................(iii).................. मनुष्येषु न .................(iv)................. प्रयुक्तम्।

(ii) क्रन्दनम् वर्धते तस्य, नान्तं समधिगच्छति।

व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत्।।

अन्वयः यः ..................(i)................ प्राप्य मोहात् ..................(ii).................
परिदेवयेत् तस्य ....................(iii)............... वर्धते, अन्तं च न ...............(iv)...................।

**मञ्जूषा**

| व्यसनम्, अपि, केवलम्, समधिगच्छति |
|---|
| अस्त्रम्, क्रन्दनम्, अतीताः, कथञ्चन |

**13. अधोलिखितवाक्येषु रेखाङ्कितं पदमाधृत्य प्रश्ननिर्माणम् कुरुत।** 1×4= 4

(i) पतितात् <u>कलशात्</u> सर्पः निस्सृतः।

(ii) बालकाः <u>नतोन्नते</u> मार्गे क्रीडन्ति स्म।

(iii) <u>द्रोणिना</u> द्रोपद्याः पुत्राः हताः।

(iv) <u>राष्ट्रं</u> सदा संरक्ष्यं भवति।

**14. अधोलिखितानि वाक्यानि घटनाक्रमेण पुनः लेखनीयानि।** ½x8= 4

1. सर्वप्रथमं तेन अरुणाचलस्य प्रकृतेः सौन्दर्यं वर्णितम्।
2. जलपानाद् अनन्तरं ते एतानि स्थलानि द्रष्टुम् गताः।
3. एकस्य विद्यालयस्य सभागारे प्रधानाचार्यः अध्यापकाः च उपविष्टाः।
4. प्रक्षेपकयन्त्रेण तेन केषाञ्चित् दर्शनीयस्थलानां परिचयः प्रदत्तः।
5. तदा तेन अस्य प्रदेशस्य प्रमुखोत्सवाः वर्णिताः।
6. पर्यटनाधिकारी प्रश्नोत्तर.माध्यमेन जिज्ञासां शमयितुम् इच्छति।

| प्र.सं. | प्रश्न | अंक |
|---|---|---|

7. तत्र पर्यटनाधिकारी समागतानां छात्राणाम् अभिनन्दनं करोति।

8. सर्वे छात्राः रम्यस्य प्रदेशस्य विषये ज्ञातुम् उत्सुकाः।

**15. प्रसङ्गनुसारम् उचितम् अर्थम् चिनुत।** ½x4= 2

(i) भो वीरौ संहरतम् संहरतम् निजास्त्रे।

(अ) संहारं कुर्वन्तु (आ) प्रतिनिवर्तयतम्

(इ) चोरयन्तु (ई) हरन्तु

(ii) द्रोणपुत्रः सव्येन पाणिना चक्रम् गृहीतवान्।

(अ) जलेन (ब) पणेन

(स) हस्तेन (द) प्रणपूर्वकं

(iii) दुष्टबुद्धि भित्तौ सन्धिं प्रकल्प्य कलशम् अक्षिपत्।

(अ) रचयित्वा (ब) कल्पनां कृत्वा

(स) सङ्कल्पं कृत्वा (द) विकल्पं चित्वा

(iv) परुषां वाचं न अभ्युदीरयेत्।

(अ) मधुराम् (ब) कठोराम्

(स) नरम् (द) पौरुषेयाम्

# आदर्श प्रश्न-पत्रम्

## कक्षा दशमी

## संस्कृति

## अपेक्षित-उत्तराणि

### खण्डः- (क) अपठित-अवबोधनम्.

**(1) एकपदेन उत्तरत।** 1x2= 2

**I.** (i) प्राणिजीवनाय (द)

(ii) (स) पृथिव्याः

**II. पूर्णवाक्येन उत्तरत।** 2x2= 4

(i) 'प्लास्टिक' इति रसायजेन निर्मितवस्त्रूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः तेषां प्रयोगं बाहुल्येन कुर्वन्ति।

(ii) अद्य 'पर्यावरण प्रदूषणम्' संसारस्य भीषणतमा समस्या परं जनाः अस्याः गाम्भीर्यं नानुभवन्ति।

**III. निर्देशानुसारम् उचितम् उत्तरम् चित्वा लिखत।** 1x4= 4

(i) (स) समस्या (ii) (अ) वृक्षेभ्यः

(iii) निरन्तरम् (iv) विस्तृताः

**IV. (स) पर्यावरणं संरक्ष्यमेव** 1x2= 2

### खण्डः - ख (रचनात्मकं कार्यम्)

**(2)** (i) नवदिल्लीतः (ii) पितृमहोदयाः 4

(iii) धावन-प्रतियोगितायां (iv) प्रथमं

(v) प्राप्स्यन्ते (vi) निमन्त्रणपत्रम्

(vii) उत्साहवृद्धिः (viii) भवतः ।

(3) मञ्जूषायां प्रदत्त शब्दानां सहायतया छात्राः स्वयंर्भव चित्रमाधृत्य कानिचित् चत्वारि वाक्यानि लेखिष्यन्ति

अथवा 2x4= 8

स्वच्छतायाः महत्त्वम् - छात्राः स्वंयमेव करिष्यन्ति

## खण्डः - ग (अनुप्रयुक्त-व्याकरणम्)

| | | | | | |
|---|---|---|---|---|---|
| (4) | सन्धि सन्धिविच्छेदं वा | | | 1x4= 4 | |
| | (i) प्रत्येकम् | (ii) | गुरौ+आगते | | |
| | (iii) भवन्मनोरथम् | (iv) | पाण्डवा:+त्वम् | | |
| (5) | समासं विग्रहं वा | | | 1x6= 6 | |
| | (i) (स) प्रतिहतान्त:करण: | (ii) | (द) पशव: च पदाणि: च | | |
| | (iii) (अ) सक्रोधम | (iv) | (ढ) शिशिर वसन्तौ | | |
| | (v) (स) विमूढा धीयस्य स: | (vi) | (द) दिनं दिनम् इति | | |
| (6) | (क) प्रकृति प्रत्यय संयोजन विभाजनं वा | | | ½x4= | 2 |
| | (i) (आ) क्रीडत: | (ii) | (अ) कियत् + ङीप् | | |
| | (iii) (स) प्रचण्ड+त्व | (iv) | (अ) वीक्षमाण: | | |
| (ख) | (i) क्रूर + तल् | (ii) | सकला | 1x2 = 2 | |
| (7) | अव्ययपदैः रिक्तस्थानपूर्तिः | | | 1x6 = 6 | |
| | (i) सम्प्रति | (ii) | तावत् | | |
| | (iii) किमर्थम् | (iv) | यत् | | |
| | (v) यदा | (vi) | श्व: | | |
| (8) | (क) उचित संख्यावाचक पद चयनम् | | | ½x4= | 2 |
| | (i) (स) चत्वार: | (ii) | (ब) तिस्र: | | |
| | (iii) (स)एकस्मिन् | (iv) | (अ) द्वे | | |
| (ख) | (i) पञ्चचत्वारिंशत् | (ii) | चतुर्विंशति: | 1x2= | 2 |
| (9) | अशुद्धिसंशोधनम् | | | 1x4 = | 4 |
| | (i) (द) (असि) | (ii) | (स) पुस्तकानि | | |
| | (iii) (स)अगच्छम् | (iv) | (द) पाठा: | | |

## खण्डः घ ( पठित अवबोधनम् ) 28

( 10 ) **गद्यांशः** 4

**I.** **एकपदेन उत्तरत** ½x2= 1

(i) चक्रवत् (ii) कालः

**II.** **पूर्णवाक्येन उत्तरत** 1x1 = 1

कालः जगतः आयुप्रमाणं गजयति।

**III.** **निर्देशानुसारं लिखत** ½x4 = 2

(i) (स) यूयम् (ii) (ब) जगते

(iii) (स) प्रलयस्य (iv) (स) इदम्

**पद्यांशः** 4

**I.** **एकपदेन** ½x2 = 1

(i) बाल्ये (ii) तपः

**II.** **पूर्णवाक्येन** 1x1 = 1

'अस्य पिता किं तपः तेपे' इति कथनं तस्य कृतज्ञतां ज्ञापयति।

**III.** **निर्देशानुसारम् उत्तरत** 1x2 = 2

(i) (ब) विद्याधनम् (ii) (द) पुत्राय

**( इ ) नाट्यांशः** 4

**I.** **एकपदेन उत्तरत** ½x2 = 1

(i) काकः (ii) कुक्कुटाः

**II.** **पूर्णवाक्येन उत्तरत** ½x2 = 1

मातरः शिशून् कथयन्ति - ''अनृतं वदसि चेत् काकः दर्शत्''

**III.** **निर्देशानुसारम् उत्तरत** ½x4 = 2

(i) (इ) वाचालः (ii) (स) काकेभ्यः

(iii) (ब) कटुभिः (iv) (इ) जनाः

( 11 ) **उचितभाव चयनम्** 1x2 = 2

(क) (iii) (ख) (i)

( 12 ) **समुचितं पदं** ½x8 = 4

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| (क) | (i) | अपि | (ii) | अतीता: | (iii) | अस्त्रम् | (iv) | कथञ्चन |
| (ख) | (i) | व्यसनम् | (ii) | केवलम् | (iii) | क्रन्दनम् | (iv) | समद्घिगच्छति |

( 13 ) **प्रश्न निर्माणम्** 1x4 = 4

(i) कस्मात् (ii) कीदृशे

(iii) केन (iv) किम्

( 14 ) **घटनाक्रमवर्णनम्** ½x8 = 4

(i) एकस्य विद्यालयस्य --------------

(ii) तत्र पर्यटनाधिकारी --------------

(iii) सर्वे छात्रा: --------------

(iv) पर्यटनाधिकारी प्रश्नोत्तर-माध्यमेन --------------

(v) सर्वप्रथमं तेन --------------

(vi) तदा तेन अस्य --------------

(vii) प्रक्षेपकयन्त्रेण --------------

(viii) जलपानाद् अनन्तरम् --------------

( 15 ) **प्रसङ्गनुसारं शुद्ध-अर्थचयनम्** ½x4 = 2

(i) (आ) प्रतिनिवर्तयतम्

(ii) (स) हस्तेन

(iii) (अ) रचयित्वा

(iv) (ब) कठोराम्